# गणेश पंच रत्न स्तोत्र



मुदा कराात्त मोदकं सदा विमुक्ति साधकम्।
कला धराव तंसकं विलासि लोक रक्षकम्।
अनाय कैक नायकं विनाशि तेभ दैत्यकम्।
नता शुभाशु नाशकं नमामि तं विनायकम्।। 1

नते तराति भीकरं नवो दितार्क भास्वरम्।
नमत् सुरारि निर्जरं नताधि काप दुद्धरम्।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम्।
महेश्वरं तमाश्रये परात्परं निरन्तरम्।। 2

समस्त लोक शङ्करं निरस्त दैत्य कुञ्जरम् ।
दरे तरो दरं वरं वरे भवक् त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करम् ।
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ।। 3

अकिं चनार्ति मार्जनं चिरन्त नोक्ति भाजनम् ।
पुरारि पूर्व नन्दनं सुरारि गर्व चर्वणम् ।
प्रपञ्च नाश भीषणं धनं जयादि भूषणम् ।
कपोल दान वारणं भजे पुराण वारणम् ।। 4

नितान्तकान्त दन्तकान् तिमन्त कान्त कात्मजम् ।
अचिन्त्य रूपमन्त हीन मन्तराय कृन्तनम् ।
रुदन्तरे निरन्तरं वसन्तमेव योगिनाम् ।
तमेकदन् तमेव तं विचिन्तयामि सन्ततम् ।। 5

महागणेश पञ्चरत्न मादरेण यो न्वहम् ।
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगता मदोषतां सुसाहितीं सुपुत्रताम् ।
समाहिता युरष्ट भूति मभ्युपैति सो चिरात् ।। 6